छायापतिशतकम्



विठलदेवुनि सुन्दरशर्मा

छायापतिशतकम्

FOR FAVOUR OF REVIEW.

विठलदेवुनि सुन्दरशर्मा
परिशोधनसहायकः
संस्कृतपरिषत्
उस्मानियाविश्वविद्यालयः
हैदराबाद्-500 007

CHAYAPATI SATAKAM
First Edition - 1983
Copies - 1000

All rights reserved

Price Rs. 6-00

This book has been
Published with the
financial assistance
granted by Tirumala
Tirupati Devasthanams,
Tirupati.

for copies :-
Srimathi V. NAGARATNAMMA,
1-9-1112/G/3, Dayanandanagar
(Vidyanagar), Hyderabad-500 044 (A.P.)

Printed at
Jitendra Printing Works
Kutbiguda
Hyderabad-500 027.

K. R. Subrahmanyam
Vice-Principal

Hindi Mahavidyalaya
Hyderabad-500 044

INTRODUCTION

We belong to the solar system. Our life is sustained by solar energy. We are trying to tap that energy more and more when we feel that we are about to exhaust other products of that energy. The Sun is the centre of this system to which our earth belongs. 'As the Surya namaskara mantras'-from the 'Taittiriyaranyaka'opening prapathaka-declare the Sun is the life essence and energy giver to the mobile and the immobile in the entire world. The worship of the Sun is an international phenomenon dating back to centuries before the dawn of the Christian era.

According to Yaska, the author of the 'Niruktam, the Sun-SURYA. is a celestial 'Dyusthana-devata',-the three classes of deities according to him being, the terrestrial, the atmospheric and the celestial. Under this Surya who is the Graharaja, lord of the planets, a world of deities is comprehended.

It is the Sun who regulates the seasons, and all Vedic sacrifices. and festivals are conducted according to the

seasons. Thus the dominance of the Sun as the Lord of the year is clear.

The Taittiriya Aranyaka's opening section already referred to gives astoundingly detailed descriptions of the various phenomena related to the Sun as the Lord of the year and the seasons. The 'Mantras' here refer to the number of suns which gradually developed into the concept of 'Dvadasa adityas' In a 'mantra' we have also the names of the seven suns - Aaroga, Bhraaja, Patara, Patanga, Svarnara, Jyotishmaan and Vibhaasa. the eighth being Kashyapa, the unchanging form located at the Mahaa meru. (20th mantra in the 7th Anuvaka). In another mantra, (63rd in 1:th anuvaka) we have the names Mitra, Varuna, Dhaataa, Aryamaa, Amsa, Bhaga. Indra and Vivasvaan.

We find a documentary, as it were, of the various seasons and the changing phases of Nature in this Vedic text. Different colours are attributed to the presiding deities of the six seasons - Vasanta, Grishma, Varshaa, Sarad, Hemanta and Sisira (Anuvaka - 3-6) The atmospheric phenomena of light cloud, thunder etc., waters, eschatalogy and the philosophy of the Brahman, Upasanas, Yagas like AARUNA KETUKA, VAISRAVANA are pressed into service and thereby making this long hymn as comprehensive as possible.

Sri Appayya Dikshita, that great polymath of the 16th century who has written not less than 104 works has sung a hymn on the Sun. This work is called 'Aaditya stotra ratnam' in twelve verses. Note the number 12 is sacred to the Sun. In the 13th verse he has beautifully summarised the contents of the hymn and also has assured us of the benefit of reading it. He has written a lucid commentary bf his own in Sanskrit to it. It is a compendium of all the important and interesting details about the Sun in Vedas, Puranas, Itihasas and Smrtis.

The SUN is a visible deity. Among the six forms of godhead noted by Adi Sankara in his Shanmata form of worship - the SAURA MATA is to worship the Highest in the form of the Sun. Even in the Panchaayatana form of worship prescribed by Adi Shankara for every householder the Sun occupies a prominent place.

आदित्यमम्बिकां विष्णुं गणनाथं महेश्वरम् ।

Even in the 'Sata Rudriya' there is the mention of 'Surya' as the one deity whom even the most illiterate like the cowherds can see and worship-

उतैनं गोपा अदृशन् अदृशन्नुदायं:

It is difficult to prove the existence of the other forms of godheads; but there is ocular proof of the existence of this God.

The Sun worship has been there in other countries af Non Hindu faiths like Egypt and Japan,

Even in the Mahabharata we are told that Draupadi was able to get the grace of the Sun god to enable her to feed any number of people even at dead of night - probably she was able to store solar energy !

In the Ramayana when the Rama-Ravana war was at its height, and Rama was almost exhausted fighting against his formidable enemy, 'Aditya Hrdayam' was given to him by Sage Agasthya to invigorate him in his endeavour to vanquish Ravana. Rama recited it thrice as directed by the sage and successfully rooted out his enemy.

In the Bhagavatam also, it is said that King Satrajit worshipped the Sun and got the 'Syamantaka' gem which perhaps symbolises the stored solar energy.

We have 'Suryopanishad' and 'Saura Purana' completely devoted to extol the glory of the Sun.

In 'Skanda Purana', we are told that for getting rid of diseases and enjoying perfect health, we must approach the Sun or 'Bhaskara'.

आरोग्यं भास्करादिच्छेच्छ्रियमिच्छेद्धुताशनात् ।
ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनात् ।।

Even modern science of hygiene testifies to the fact that the solar rays kill disease germs.

The famous Gayatri mantra is also interpreted by many as directing our concentration to the Sun god and his most adorable ray which stimulates our intellectual faculties.

तत्सवितुर्वरेण्यं
भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात्

Narayana, Sive or Sakti is supposed to reside in the orbit of the Sun 'Surya Mandala'.

a) ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ॥

b) सौरमण्डलमध्यस्थं साम्बं संसारभेषजम् ।
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥

c) भानुमण्डलमध्यस्था — (ललितासहस्रनाम)

Now keeping in view the importance of the Sun, the scholar poet, Pandit Vitthala devuni Sundara Sarma has composed a beautiful hymn of a hundred verses - 'Cchaayaapati Satakam'. In simple but effective language, he has brought out all the essential aspects of Sun worship.

The author of this hymn has referred to the Sungod as 'Chayapati', sincc the Sun has got, according to mythology, two consorts, one of whom is छाया and the other is संज्ञा also called सुवर्चला.

After the usual prayer to Vighnaraja and expressing his humility, he proceeds to pinpoint the most effectivc feature of the Sun - आमयनिवृत्ति the removal of diseases (Verse 5). The relationship which is mysterious between the lotus and the sun though separated by crores of miles, so well referred to by the great poet Bhavabhuti in his verse

व्यतिषजति पदार्थानान्तरः कोऽपि हेतुः ।
विकसति च पतङ्गस्योदये पुण्डरीकम् ।।

is brought out in verses 6, 7, 14, 26 and 39; it is a scientific fact that the Sun lends his lustre to the moon and the other planets (9,87)

When one looks at the Sun one is taught the lesson as it were, that one should work even without a moment's rest (11). The sun is one of the ten Witnesses of man's actions secret or open (1', 18).

The importance of the Sun's rays falling on the earth cannot be overemphasised ; the realisation of this

fact is evident in Amarasimha's 'Naamalingaanusasanam' which defines a dark cloudy day as 'a bad day' :

मेघच्छन्नेऽह्नि दुर्दिनम्

This is noted in this hymn in verse 19.

This Sun god is easily pleased just by prostrations (25). By his rays he does good to the entire universe (34) His vision is marked by equality; he does not have either prejudice or partiality towards any one (36, 37, 51).

It is common knowledge that when the Sun shines, that is, in broad daylight, people are rid of fear as contrasted with the situation in darkness. (41)

The Sun draws water from the various sources likes, ponds, rivers and the seas only to give it back thousandfold (42) The great poet Kalidasa has expressed this idea in his Raghuvamsa, Canto 1, Sloka-

सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥

It is interesting to note the Sanskrit word दोषा referring to the night when the Sun is away lightening the other hemisphere; it suggests that in the absence of sunlight crimes are committed (45)

The Sun gives light and heat without axpecting are return (64)

The famous episode in the Yuddha Kanda of Valmiki Ramayana in which Sage Agasthya teaches Rama the Japa of Aditya Hrdayam is referred to in Verse 66.

Even the great Hanuman who is going to be the next Brahma भविष्यच्चतुरानन: is said to have learnt everything from the Sun god (67, 68).

When the Sun sets many accidents occur in the darkness (74)

The Sun is self - effulgent, not depending upon any other luminary for his light (80)

It is difficult to worship the Sungod with anything original (85) Even Adi Sankaracharya in the last Sloka of his 'Soundarya Lahari' has referred to this fact -

प्रदीपज्वालाभि: दिवसकरनीराजनविधि:

Everyone eagerly waits for the rise of the Sun to pursue his daily round of duties to earn his livelihood or to complete the unfinished work (88)

The Sun helps everyone to see the things in this world; without the light supplied by him no one can see anything (97).

Even though the Sun has the capacity to burn away anything, he graciously sends only so much heat to the earth that he is more a protector than a destroyer (38, 97).

The Sun's grace is something quite natural, not the result of any cause (62, 81, 95)

It is very significant to note that the Vedas and Smrtis have enjoined on the Twice born (Brahmana, Kshatriya and Vaisya) to perform Sandhyopasana every day and offer 'arghya' to Sungod while he ris s, is at his zenith and white he a sets ; the waters of the 'arghya' sanctified by the pronouncement of the sacred Gayatri mantra are said to become thunderbolt like missiles to help the Sungod in his daily eombat with the forces of darkness and in throwing them in the island of 'Mandeharuna' (78).

It is the Sun to whom people look up for getting robust health (84).

It is curious to note that the Sun is ever active, not taking even a moment's rest; this fact must induce everyone to be always active. (93) He is there ready

to rouse even the laziest and bless him with energy and enthusiasm to work (70) Rahu is a symbol of darkness- note Amarasimha's definition -

तमस्तु राहुः स्वर्भानुः

and naturally the Sun is his deadly enemy (28, 29, 30, 57) -

The Sun's son 'Yama' is noted for his impartiality - he is 'Death', the leveller (27).

Thus this hymn composed by Sri V. Sundara Sarma is a very useful and effective stotra which will be found by every reader to be easy and pleasant.

The great commentator on Valmiki Ramayana, Mahesvara Tirtha, while explaining the inner significance of the famous 'Aditya Hrdayam' in the Yuddha Kanda has enumerated 108 names of the Sungod culled from that text. It runs from सर्वदेवात्मकः to लोकसाक्षिणे..

This Hshtottara - namavali is appended to the introduction for the benefit of the readers of this hymn-

श्रीआदित्याष्टोत्तरशतनामावलिः
आदित्यहृदयस्तोत्रात् संकलिता

सर्वदेवात्मकाय नमः
तेजस्विने नमः
रश्मिभावनाय नमः
देवासुरगणलोकपालाय नमः
ब्रह्मणे नमः
विष्णवे नमः
शिवाय नमः
स्कन्दाय नमः
प्रजापतये नमः

10. महेन्द्राय नमः
धनदाय नमः
कालाय नमः
यमाय नमः
सोमाय नमः
अपांपतये नमः
पितृदेवतायै नमः
वसुमूर्तये नमः

साध्यमूर्तये नमः
अश्विमूर्तये नमः

20. मरुन्मूर्तये नमः
मनवे नमः
वायुमूर्तये नमः
वह्नये नमः
प्रजारूपाय नमः
प्राणाय नमः
ऋतुकर्त्रे नमः
प्रभाकराय नमः
आदित्याय नमः
सवित्रे नमः

30. सूर्याय नमः
खगाय नमः
पूष्णे नमः
गभस्तिमते नमः
सुवर्णसदृशाय नमः
भानवे नमः
हिरण्यरेतसे नमः
दिवाकराय नमः

हरिदश्वाय नमः
सहस्रार्चिषे नमः

40. सप्तसप्तये नमः
मरीचिमते नमः
तिमिरोन्मथनाय नमः
शम्भवे नमः
त्वष्ट्रे नमः
मार्तण्डाय नमः
अंशुमते नमः
भगवते हिरण्यगर्भाय नमः
शिशिराय नमः
तपनाय नमः

50. भास्कराय नमः
रवये नमः
अग्निगर्भाय नमः
अदितेः पुत्राय नमः
शङ्खाय नमः
शिशिरनाशनाय नमः
व्योमनाथाय नमः
तमोभेदिने नमः

ऋग्यजुः सामपारगाय नमः
घनवृष्टये नमः

ॐ० अपांमित्राय नमः
विन्ध्यवीथीप्लवङ्गमाय नमः
आतपिने नमः
मण्डलिने नमः
मृत्यवे नमः
पिङ्गलाय नमः
सर्वतापनाय नमः
कवये नमः
विश्वस्मै नमः
महातेजसे नमः
रक्ताय नमः
सर्वभवोद्भवाय नमः
नक्षत्रग्रहताराधिपाय नमः
विश्वभावनाय नमः
तेजसामपि तेजस्विने नमः
द्वादशात्मने नमः
पूर्वाय गिरये नमः
पश्चिमे गिरये नमः
ज्योतिर्गणानां पतये नमः
दिनाधिपतये नमः

80. जयमूर्तये नमः
जयभद्राय नमः
हर्यश्वाय नमः
सहस्रांशवे नमः
आदित्याय नमः
उग्राय नमः
वीराय नमः
सारङ्गाय नमः
पद्मप्रबोधाय नमः
मार्ताण्डाय नमः

90. ब्रह्मेशानाच्युतेशाय नमः
सूर्याय नमः
आदित्यवर्चसे नमः
भास्वते नमः
सर्वभक्षाय नमः
रौद्रवपुषे नमः
तमोघ्नाय नमः
हिमघ्नाय नमः
शत्रुघ्नाय नमः
अमितात्मने नमः

100. कृतघ्नघ्नाय नमः
देवाय नमः
ज्योतिषांपतये नमः
तप्तचामीकराभाय नमः
हरये नमः
विश्वकर्मणे नमः
तमोभिनिघ्नाय नमः
रुचये नमः

108. लोकसाक्षिणे नमः

19-3-83 K. R. Subrahmanyam



विठलदेवुनि सुन्दरशर्मा

समर्पणम्

3. नाहं कविर्न खलु शब्दविकासवेत्ता
वेदान्तशास्त्रसुविचारमहं न जाने ।
आलम्बनं त्वमसि देव ! मम प्रयत्ने
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

4. नाम्नैव 'सुन्दर' इति प्रथितोऽस्मि देव !
सौन्दर्यमस्ति न हि किञ्चिदपीह वाचि ।
कः प्रौढिमा तव गुणस्तवने हि मेऽस्ति ?
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

104. विश्वैकपूज्य ! तव विश्वगुणांश्च वेत्तुं
स्तोतुं प्रभावमथ कोऽहमहो दिनेश !
अज्ञेन चेयमिह ते ग्रंथिता नुतिर्हि
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

105. शेषोऽपि नालमथ ते चरितं विवेक्तुं
लोकोत्तरस्त्वमतिसुन्दरमूर्तिर्हि चाहम् ।
अङ्गीकुरुष्व मम वाचिकवार्भकस्य
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

108. कायेन चाथ वचसा मनसेन्द्रियैर्वा
बुद्ध्यात्मना च सततं क्रियते मया यत् ।
सर्वं हि तुभ्यमहमद्य समर्पयामि
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

वि. सुन्दरशर्मा

छायापतिर्भगवान्

सप्ताश्वमद्भुतरथं गरुडाग्रजात-
सञ्चोदितं समधिरुह्य जगद्धितार्थम् ।
प्रस्थाय विश्वमखिलं निजकान्तिपुञ्जैः
संशोभयन्तमनिशं प्रणमामि सूर्यम् ॥

Vidyapraveena, Bhashapraveena,
Dr. M. CHANDRASEKHARA SARMA,
M.A. (Sanskrit and Telugu) B.Ed., Ph.D.
Lecturer in Sanskrit,
Govt. College for Women,
Begumpet, Hyderabad.

आलोकः

परिसरप्रभावबशेन वा पूर्वजन्मसुकृतवशेन वा आत्मनि सोद्वेगं सम्पद्यमानाः भावाः शब्दरूपेण संस्फुटच वर्णपदवाक्छन्दोमयं दिव्यं सारस्वतं स्वरूपमाविष्कुर्वन्तीति विदितचरमेव विश्वेषां विदुषाम्। तथाविधमाविष्क्रियमाणेषु सारस्वतस्वरूपेषु स्तुतिरूपं किञ्चिदस्ति यदाद्यं पार्यन्तिकञ्च कवितायाः। कविता तावत् कवीनां प्रथममिष्टस्तुतिरूपेणाविर्भूयमाना अन्ततश्च नवनवोन्मेषरसरुचिरा पर्यन्ते च परमार्थप्रकाशिनीव देदीप्यमाना दरीदृश्यते। मल्हणस्तुतिरत्रोदाहरणम्। सा च "कान्ताकचप्रचयपुष्पसुगन्धो"ति स्ववेश्यकान्ताकचकुसुमगन्धमेवानुधावन्त्यपि क्रमेण "गङ्गातरङ्गजलधौतजटाकलापं, कामाङ्गदग्धसितभस्मविभूषिताङ्ग"मेवानुलीना बोभवीति।

तदेतत् स्तुतिसाहित्यं "अग्निमीळे पुरोहितम्" इति ऋग्वेदप्रथमसूक्तादेवारब्धं; रामायणमहाभारतादीतिहासपुराणग्रन्थेषु, कुमारसम्भवादिमहाकाव्येष्वपि सञ्जनुवृत्तं, सर्वस्वतन्त्रतया च भर्तृहरि, जयदेव, बाण, मयूर, श्रीशङ्कर, कुलशेखर, लीलाशुक, पुष्पदन्त, मल्हण, मलयराज, दण्डि, हलायुध, अप्पय्यदीक्षित, जगन्नाथपण्डितरायादिभिर्महाकविभी रचितेषु

नीति, शृङ्गार, वैराग्य, गीतगोविन्द, चण्डी, सूर्य, शिवसौन्दर्य-लहरी, मुकुन्दमाला, कृष्णकर्णामृत, महिम्न, मल्हण, मलयराज-अनामय, हलायुध, वरदराज, गङ्गालहर्यादिस्तुतिषु परां काष्ठामधिष्ठितमिति साहित्यसर्वस्वस्यापि स्तुतेरेव प्राधान्यं प्रतीयते ।

अथ का नाम स्तुतिः ? कतिविधा च सा ? गुणनिष्ठ-गुणाभिधानं, आरोप्य गुणकथनं वा स्तुतिरिति, गीतमात्रसाध्यं कर्म सामसन्त्रसाध्या स्तुतिर्वा स्तोत्रमिति च भिक्षुगौरीशङ्करैः स्वसर्वलक्षणसंग्रहे प्रतिपादितम् ।

तथा च वेदमन्त्रैर्वा लौकिकवचोभिर्वा यत्र गुणवर्णनेन गुणिनः पारमार्थिकं तत्त्वमानन्दस्वरूपं ज्ञानगोचरीक्रियते सा स्तुतिरिति निर्वक्तुं शक्यते । सैषा स्तुतिः नामरूपा पद्यरूपा चेति द्विरूपा । उभे अपि एकादिशतसहस्रपर्यन्तं संख्यया निबद्धचमाने परिदृश्येते । नदेवं नामपद्यस्तुतीनां संख्यानिबन्धनं जपध्यान-द्वारा परतत्त्वावाप्तिसाधकमेवेति प्रतिभाति । तथा हि — जप-साधनरुद्राक्षप्रभावं शिवपुराणे विश्वेश्वरसंहितायां विवृण्वता व्यासेन महामुनिना एकादिचतुर्दशमुखानां रुद्राक्षाणां प्रभावं प्रकाशन—

'शतमेकोत्तरं कण्ठे' (25-29)

'अष्टोत्तरशतं माल्यमुपवीतं प्रकल्पयेत्' (25-35)

'वक्षस्यष्टोत्तरं शतम' (25—37)

'अघोरेण गले धार्यं तेनैव हृदयेऽपि च' (25—40)

इत्यादिना एकोत्तरशतरुद्राक्षमालायाः कण्ठे, अष्टोत्तर-शतरुद्राक्षमालायाः वक्षसि उपवीतमिव च अघोरमन्त्रेण धार्यतया प्रतिपादितम् । अपि च तत्रैव—

'विद्यार्थी पुरुषः प्रीत्या सहस्रमितपार्थिवम् ।
पूजयेच्छिवलिङ्गं हि निश्चयात्तत्फलप्रदम् ।।'

'भूकामश्च सहस्रकम्'

इत्यादिना च पार्थिवाराधने सहस्रसंख्यायाः प्रापणीयं फलं च प्रकाशितम् ।

एवं च (सूर्यस्मापि भर्गात्मकतया) एकोत्तरशत अष्टोत्तरशत-सहस्रमितनामपद्यस्तुतीनां जपध्यानचिदानन्दाधारभूतं वाचिकं हार्दिकं तत्त्वविद्याविषयकं च प्राधान्यं व्यासमुनिना सूचितम् ।

तदेतदस्मन्मित्रवर्यैर्बहुभाषाकोविदैरनेकप्राच्यलिखितपुस्तकभाण्डागारग्रन्थपरिशीलनपरिष्कारकुशलैः श्रीनिवासशतक, देवीशतक, वीराञ्जनेयशतक, शम्भुशतकादि शतकप्रबन्धसन्धानधौरेयैरनल्पकल्पनाकल्पितवाणीविलाससौन्दर्यैर्विठलदेवुनि सुन्दरशर्मभिर्विरचितं 'छायापतिशतक'मष्टोत्तरशतरूपं कविवराणां पठितॄणां च सर्वेषामपि हार्दिकं चिदानन्दमातनोतीति सम्भाव्यते ।

अत्र शतकाभिधाने सूर्यनाम्नां छायापतिनाम्न्येव सुन्दरशर्मणामादरातिशय इव प्रतिभाति । छायासूर्यावधिकृत्य तु—

'अदितिकश्यपयोः सुतस्य विश्वकर्मपुत्री संज्ञानाम्नी भार्या आसीत् । तस्यां यमः समजायत । एवंदा सूर्यस्य तैक्ष्ण्यमसहमाना संज्ञा स्वच्छायां सूर्यस्य सकाशे निक्षिप्य पितुः गृहं जगाम । ततश्छायायां शनिः सावर्णी च समजायेताम् ।' इत्यैतिह्यम् । एतेन छायापतेः शनिपितृतया, शनेश्च जनपीडाकरत्वेन तन्मातापितरौ छायासूर्यौ तच्छनिपीडापरिहाराय

समासेन स्तोतुं शर्माण उद्दिदिशुरिति प्रतिभाति । 'त्वं लोक-बन्धुरसि देव ! तवात्मजात' (27) इति पद्ये-पिता लोकबन्धुः सूर्यः, पुत्रो तु लोकपीडनमारणचणो-इत्येतावन्मात्रमुल्लिखद्भिः सुन्दरशर्मभिः कथम् ? इति 'आश्चर्यहास्ये, निन्दानिवारणाय तौ सत्वरं नियम्येताम्' इति शनिशमनदमनाकांक्षां व्यञ्जयद्भिः स्वाकूतं सुमनोमनोज्ञमासूचितम् ।

अथ वा छायेति कान्तिनाम । 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपम्' इत्यमरवचनात् । तथा च विगतसन्तापेन कमनीयायाः कान्त्याः पतेः सूर्यात् तापलेशशून्यं शर्मैकधर्मं तेजः-सौभाग्यं सुन्दरशर्माणः समैच्छन्नित्यभ्यूहे ।

संस्कृतसाहित्ये सूर्यशतकस्य रचयिता मयूरो महाकविः सुप्रसिद्धः । स च भानोः किरण, अश्व, सारथि, रथ-मण्डलानि स्रग्धरावृत्तेषु संस्तुत्य अन्ततः सूर्यं तुष्टाव । तदेवं पञ्चमुखात्मकस्य सूर्यस्य पाञ्चमुखी मायूरी सरणिः स्तुतेः पठतृश्रोतृरक्षाप्रार्थिनी चकास्ति ।

सुन्दरशर्मभिस्तु छायापतिशतके 'छायापते! ग्रहकुलाधिप! लोकबन्धो !' इति सूर्यस्य सम्बोध्यतया छायापतित्वं ग्रहकुलाधिपत्वं लोकबन्धुत्वं च त्रयं मुकुटमाकल्पितम् । शन्यादिग्रह-बाधानिवृत्तिद्वारा सुखसञ्जीवनानुग्रहाभिप्रायकमेतन्मुकुटं सम्बोधनात्मकतया आत्मनिवेदनप्रार्थनं, अभिलषितार्थनिर्वर्त्तनानुयोगः, लोकदुर्वृत्तविज्ञापनं, स्तुतिः, सदुपदेशश्चेवमादीन्यन्यान्यपि लक्ष्याणि क्रोडीकरोति ।

सुन्दरशर्मणां 'छायापतिशतक'सरणिस्तु क्वचित्लोकवृत्तं, क्वचिद्वास्तविकं (वस्तु (कथा) सम्बन्धि), क्वचित्तात्त्विकं, क्व-

चिदालङ्कारिकं, क्वचिदन्यान्यं च विषयं यथापरितोषं सहृदय-विदुषामाचिन्वती विजयतेतराम् ।

सुधामरीचेर्दोषाकरत्वेन समासोक्तिच्छायया स्वसङ्क्रामितप्रभावेन स्वकीयानामेव हानिरधुनातनकाले क्रियत इति (9), खरकरकिरणप्रसाराभावे सर्वमयार्त्तिनिवहस्यैव राज्यं भवेदिति च (5), क्वचित्क्वचिल्लीढदुर्वृत्ते विज्ञापितम् । आर्त्तैकरणपरस्य सूर्यस्य निर्विरामता योग्यैवेत्यादिभिः क्वचित्क्वचित्सुजनवृत्तिरपि विज्ञापिता ।

'संशोषयस्यनुदिनं ननु वारि भूस्थं
काले प्रदातुमथ भूरिपयस्समृद्धिम्' (42)

इति पद्यम्—

'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः' इत्येतत्कालिदासीयं पद्यं स्मारयति । अपि च—

'गन्तव्यमन्तरहित'मिति (43) पद्यं

'रथस्रैकं चक्रं भुजगयमिताः सप्त तुरगाः
निरालम्बो मार्गश्चरणविकलः सारथिरपि ।
रवियात्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियसिद्धिः सत्त्वे भवति महतां नोपकरणे ।।'

इति सुप्रसिद्धं पद्यमनुसंवदति ।

सुन्दरशर्मणामालङ्कारिकसरसकवितायाः 21, 22 पद्यद्वयमुदाहरणम् । अत्र सूर्यस्य अयनद्वयगतेः दक्षिणोत्तराभ्यां (दिग्भ्यां स्त्रीभ्यां च) समकालसहयोगप्रकाशनेन दाक्षिण्यप्रदर्शनार्थतया उत्प्रेक्षणं; अनन्तरपद्ये तस्यैव उत्तरस्यां प्रचण्डतीक्ष्णस्वैरिता, दाक्षणस्यां च शीतसौम्यता चेति कालकृतवैचित्र्याविष्करणं च सम्भावितरमणीयं पूष्णः पौष्करं रस्यं महः समु-

द्योतयत: । तथैव 26 तमे पद्ये ऐहिकश्रेयोविधायिनोः कमला-कमलासनयोरावासकमलानामपि विकासविस्मरनूतनशोभासौग-न्ध्यरस्यं सौन्दर्यमातन्वती श्रेय:प्रदानेऽपि मार्त्ताण्डस्य निरुपम-मनोज्ञा मयूखमाला 'मायूरी'मरीचिमालामनुस्मारयन्ती तात्त्विक-मपि विषयं विज्ञापयति ।

मारुते: भास्कराद्विद्याध्ययनरूपं वस्तु वर्णयन्त: श्रीसुन्दर-शर्माण: — "शाखामृग: शिष्य:, खचराग्रणीर्गुरु:, कथमनयो-र्विद्यासन्धानम् ? कथं च शाखामृगेण सर्वज्ञतावाप्ति: ?' इति श्लोषविरोधाभासादिभि: पतङ्गस्य प्रभां मारुतेर्मनीषां, तदनु-गृहीतां स्वीयां च प्रतिभां सन्नीय सुहासमधुरगम्भीरं साम्रस्यं प्रत्यपादयन् ।

वसन्तविलासिनश्छायापते: वसन्ततिलकावृत्तच्छन्दसि स्तुतिर्महद्वृत्तौचित्यं शतकस्यास्य सन्तनुते । वसन्तर्तुतिलकस्य सूर्यस्यैव वृत्तं वसन्ततिलका । अस्मिन्नेव च्छन्दसि वसन्तर्तुप्रभाते तिलकायमान: सूर्य:, तत्स्वर्णकिरणै: स्वर्णाभरणैरिव सम्भूषिता वासन्ती धरणिश्च । तदेतत् 98 तमे पद्ये वर्णयद्भि: श्रीसुन्दर-शर्मभिरौचित्यसर्वस्वं सम्पादितं स्वशतकस्येत्यभिप्रयन् —

श्लो । तारासारैकवर्षी निशि तमसि वियत्क्षत्रराजीषु नित्यं
त्रैमूर्त्तस्वात्सतेज:स्फुटपटुनटनश्रीविलासैकरङ्ग: ।
सप्तैकस्वच्छगच्छ: सुनिशितमहसां व्योमसीमान्तभाजा-
मालोक: सार्वलोक: सवितुरवतु न: 'सुन्दर'श्रीवचोभि:।।

इत्याशास्ते । इति शम्

हैदराबाद्
23-3-1983

मूलम्पल्लि चन्द्रशेखरशर्मा

वक्तव्यं किञ्चित्

अव्याजकरुणाकटाक्षवीक्षणानुगृहीतसर्वलोकस्य भगवतः श्रीनिवासस्य निरतिशयानुग्रहबलात्, सहजवात्सल्यैकमण्डनानामस्मदाचार्यवर्याणां परिपूर्णाशीर्बलात्, भर्त्रा साकं पुण्यलोकवासिन्या मज्जनन्याः विठलदेवुनि गौरम्माभिधानायाः श्रीमत्याः गौरीदेव्याः निरन्तरवात्सल्यार्शं विशेषाच्च गतेषु 1978, 1980, 1981, 1982 वत्सरेषु मद्रचित्तं श्रीनिवासशतकादिशतकचतुष्टयं मुद्रितं प्रकाशितं चाभूत्। तच्च शतकचतुष्टयमान्ध्रभाषायामुपलभ्यमानां शतकरचनाप्रक्रियामनुसृत्य समकुटं निरमायि।

यच्च सम्बुद्धचन्तमकुटनिर्मितिरितः पूर्वतने 'वीराञ्जनेय शतके' 'शम्भुशतके' च समादृताऽभूत् सैवात्रापि 'छायापतिशतके' समादृताऽस्ति।

तदेतस्य 'छायापतिशतक'स्य प्रकाशनार्थं द्रव्यसाहाय्यमुद्घोषितवद्भ्यः श्रीमत्तिरुमलतिरुपतिदेवस्थानाधिकारिभ्यः समर्प्यन्ते हार्दा नमोवाकाः। गौर्वाण्यां 'आलोक'रचयितृभ्यः डा. यम्. चन्द्रशेखरशर्ममहोदयेभ्यः, तथा आंग्लभाषामयोपोद्घातनिर्मातृभ्यः श्रीमद्भ्यः K. R. सुब्रह्मण्यमहोदयेभ्यश्च कृतज्ञतापूर्वकप्रणामांजलिरर्प्यते। छायापतेर्भगवतो रेखाचित्रनिर्मात्रे मत्तनूजाय आयुष्मते राजशेखराय सन्त्वनन्ता आशिषः। ग्रन्थमिमं सुन्दरं मुद्रितवन्तो 'जितेन्द्रप्रिंटिंग्वर्क्स' संस्थीया धन्यवादार्हाः।

हैदराबाद्
20-3-1983

विठलदेवुनि सुन्दरशर्मा

श्रीः

विठलदेवुनि सुन्दरशर्मणा विरचितं

छायापतिशतकम्

—०—

गुरुस्तुतिः

प्रणमामि गुरुं नित्यमज्ञानध्वान्तभास्करम् ।
यत्कृपावशतो मन्दो ध्रुव जायेत सत्कविः ॥
अज्ञानतमसा व्याप्तं जायतेदं जगत्त्रयम् ।
यदि नाम गुरुर्न स्याद्दिव्यज्ञानैकदीप्तिदः ॥
गुरोः कृपाविशेषेण चोद्बुद्धा कविता मयि ।
तत्प्रभावमहिम्ना च मया 'सुन्दर'शर्मणा ॥
अष्टोत्तरशतैः पद्यैः 'छायापति'पदाङ्कितैः ।
श्रीम'च्छायापतिशतं'भक्तिपूर्णं विरच्यते ॥
ये चात्र सुगुणास्ते तु गुरोराशीर्विशेषतः ।
मदीयाज्ञानजा दोषाः क्षन्तव्यास्ते मनीषिभिः ॥

पितृस्मृतिः

मेधाविभवसम्पन्नानस्मद्वंशैकमौक्तिकान् ।
विशुद्धाचारसम्पन्नान् ज्योतिःशास्त्रविशारदान् ॥
वीरास्वाम्यपराख्यांश्च वीरराघवशर्मणः ।
नत्वा श्रीमत्तातपादान् स्मृत्वा तच्चरणद्वयम् ॥
मज्जीवनाधारभूतां वात्सल्यामृतवर्षिणीम् ।
श्रीगौर्यम्बां च जननीं प्रणमामि सहस्रशः ॥

शतकप्रारम्भः

—०—

1. श्रीविघ्नराजमतुलं हृदि भावयामि
प्रारिप्सितस्य शतकस्य समाप्तिकामः ।
विघ्नान्निवारयतु सोऽयममेयरूप—
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

2. आदित्य ! लोकहित ! देव ! सहस्रभानो !
तेजोनिधे ! दिनकर ! प्रकटप्रकाश ! ।
ज्योतिःस्वरूप ! भुवनेऽद्य ! गुणैकसिन्धो !
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

3. नाहं कविर्न खलु शब्दविकासवेत्ता
वेदान्तशास्त्रसुविचारमहं न जाने ।
आलम्बनं त्वमसि देव ! मम प्रयत्ने
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

4. नाम्नैव 'सुन्दर' इति प्रथितोऽस्मि देव !
सौन्दर्यमस्ति न हि किञ्चिदपीह वाचि ।
कः प्रौढिमा तव गुणस्तवने हि मेऽस्ति ?
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

5. लोकत्रयीजननिकायवरप्रदीपो
नास्तीह चेत्तव विभो ! किरणप्रसारः ।
सर्वामयार्त्तिनिवहस्य भवेद्धि राज्यं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

6. निम्नाश्रयं तु सलिलं सहजस्वभावा-
न्नीरं तदाश्रयति पद्ममनाश्रितं नु ।
तच्चेह पद्ममभवत्खलु ते सुमित्रं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

7. अत्युन्नते गगनसीमनि दुर्गमे त्वं
सञ्चारशील इति विश्वजना विदन्ति ।
कासारजं कथमहो नलिनं सुमित्रं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

8. कान्त्या तवैव ननु भास्कर ! सर्वविश्वं
भातीह देव ! निजकान्तिनिकायशून्यम् ।
अन्तर्हिते त्वयि तु गाढतमोविभूति-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

9. भानो ! मरीचिनिवहात्तव कान्तिपुञ्जं
प्राप्य स्वयं ननु हिनस्ति तवाप्तवर्गान् ।
दोषाकरत्वमत एव सुधामरीचे-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

10. भक्तेष्टपूरणविधिप्रकटप्रभावा
बर्हिर्मुखा बहुविधा ननु सन्तु नाम ।
प्रत्यक्षदैवमिति देव ! भवान् प्रसिद्ध-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

11. विश्रान्तिरस्ति न हि ते खलु निर्विराम-
सञ्चारणे कृतमतेर्भुवनावनाय ।
आर्त्तैकरक्षणपरस्य हि को विराम-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

12. गोचारतो ग्रहवरा इतरे नरेभ्यः
सर्वे दिशन्ति सुखदुःखमयं फलं हि ।
त्वं यच्छसीह [1]सुखमेव सदा नु देव !
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

1, आरोग्यरूपमित्यर्थः

13. त्वं क्वसि देव ! सकलामयनाशकत्वात्
स्तुत्योऽसि सर्वजनुमद्भिरहं नुतौ ते ।
शक्तो न चास्मि ननु वाक्पटुताविहीन–
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

14. फुल्लानि केवलमहस्कर ! नो भवन्ति
सम्पर्कमेत्यकिरणैस्तव पङ्कजानि ।
मोदं चराचरजगत्सकलं प्रयाति
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

15. अस्तं गते त्वयि तु गाढतमोविभूतौ
मग्नं हि विश्वमखिलं जडतामुपैति ।
लब्धोदये च पुनरेति सचेतनत्वं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

16. आनन्दमेति हि जनस्त्वयि चोदिते न–
न्वस्तं गते त्वयि तु देव ! समेति दुःखम् ।
मूलं त्वमेव सुखदुःखगतेर्जनानां
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

17. सम्पश्यसीह सचराचरजीवजालं
तेषां च कर्म सकलं; ननु शोभमाने ।
सत्येव हि त्वयि विभो ! सफलं नु कर्म
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

18. एकोऽपि हि त्वमथ पश्यसि दूरवर्त्ती
सत्कर्म वा तदितरं चरितं जनैर्यत् ।
संकथ्यसे तदिह भास्कर ! कर्मसाक्षी
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

19. मेघावलीस्थगितकान्तिरहस्करेन !
नों दृश्यसे गगनसीमनि यद्दिनें त्वम् ।
सर्वे वदन्ति तदहो ननु दुर्दिनं हि
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

20. भूमीचरा वयमहो ! खचराग्रणीस्त्वं
को वाऽनुबन्ध इह भूचरखेचराणाम् ।
सर्वस्य बन्धुरसि चित्रमथापि देव !
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

21. द्वेधा विभज्य ननु कालमहस्कर ! त्वं
साम्यं प्रदर्शयितुकाम इवोत्तरस्याम् ।
दिश्येषि भास्कर ! समं खलु दक्षिणस्यां
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

22. चण्डोऽसि तीक्ष्णकिरणोऽसि यदाप्युदीच्यां
स्वैरं हि सञ्चरसि भास्कर ! दक्षिणस्याम् ।
शीतोऽसि सौम्यकिरणोऽप्यसि चित्रमेतत्
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

23. गाढान्धकारवलये पतितं जगत्त्व-
मुद्धृत्य दीप्तियुतमाशु करोषि यस्मात् ।
तस्माद्धि लोकगुरुता तव नित्यसिद्धा
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

24. सर्वे गुणास्तव हि सन्तु सुदूरतस्तान्
लोकत्रयी प्रभवतीह न चापि वेत्तुम् ।
नारायणाश्रय इतीदमलं प्रशस्यं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

25. क्लेशावहैरतितरामनिशं तपोभिः
प्रीता भवन्ति ननु चक्रधरादिदेवाः ।
प्रीणासि भास्कर ! नमस्कृतिमात्रतस्त्वं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

26. लक्ष्मीविरिञ्चिनिजवासगृहस्य शोभां
या तन्तनोति नितरां हि निजाभिमर्शात् ।
श्रेयो ददातु तव सा च मयूखमाला
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

27. त्वं लोकबन्धुरसि देव ! तवात्मजात-
श्चैकस्तु पीडयति लोकमनारतं हि ।
लोकस्य जीवहरणे चतुरोऽस्ति चान्य-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

28. शक्तो बभूव न तु राहुरसौ तवारि-
स्त्वां हिंसितुं तदनु भृङ्गवरः स भूत्वा ।
आप्तांश्च ते पुरत एव हिनस्ति पद्मान्
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

29. क्रूरः स राहुरसकृत्परिपीडने ते
वैफल्यमेत्य ननु तीव्रपुराणकोपात् ।
रूपं समेत्य तमसश्च हिनस्ति पृथ्वीं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

30. तेजोविभूतिमथ वीक्ष्य तवातिभीतो
गाढन्धकारनिवहं शरणं प्रपन्नः ।
स्वर्भानुरद्य ननु तिष्ठति भीतिहीन-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

31. ब्रह्मादिदेवनिकरा नितरां स्तुतास्ते
प्रीता भवेयुरथ वा न च वा भवेयुः ।
प्रीतोऽसि नित्यमथ नः प्रियमातनोषि
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

32. छाया च लोकसुखदा हि निदाघकाले
शीतागमे च सुखदोऽसि कराभिमर्शात् ।
चित्रं युवां भुवनरक्षणबद्धदीक्षौ
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

33. सर्वंसहा समभवत्सहनाद्धरित्री
क्लेशस्य भारवहनाज्जनितस्य नित्यम् ।
नेयं सहेत तव देव ! वियोगदुःखं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

34. तीक्ष्णोऽथ वाऽस्तु ननु तीक्ष्णतरोऽथ वाऽस्तु
मन्दोऽपि वा भवतु मन्दतरो महात्मन् ! ।
कल्याणकृद्भवति ते किरणप्रसार-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

35. गोचारतो दिशसि यत्फलमम्बुजाप्त !
दैवज्ञसंसदिह तन्ननु वेत्ति दैवम् ।
लोकाय यद्दिशसि सौख्यमहं तु वेद्मि
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

36. सर्वं समं सममितीह वदन्ति सर्वे
स्वार्थैकचिन्तनपराः समतां त्यजन्ति ।
सर्वं जगत्त्वमथ पश्यसि निर्विशेषं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

37. चित्रातिचित्रमथ ते खलु साम्यवृत्तं
चण्डालवेश्मनि तथा ननु यज्ञवाट्याम् ।
भानो ! समं भवति ते किरणप्रसार-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

38. चण्डांशुनामवशतः किल तीक्ष्णतापं
ग्रीष्मे हि यच्छसि जनाय विनाऽनुतापम् ।
लोकस्तथापि ननु वाञ्छति नित्यशस्त्वां
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

39. मोक्षैकसाधनमथेह वदन्ति शुद्धं
ज्ञानं नु तद्धि तव देव ! कृपैकलभ्यात् ।
आरोग्यतो भवति देहि तदेव अह्यं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

40. एके वदन्ति निपुणं ज्वलदग्निगोलं
त्वामामनन्ति बहवो ग्रहराजमन्ये ।
नारायणं तदनु देव ! तदाश्रयं च
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

41. अस्तं समेति भगवंस्त्वयि सर्वलोकाः
भीत्याकुलाः सकलदुष्कृतिहेतवोऽमी ।
मोदं च धैर्यमिह यान्ति ननूदिते हि
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

42. संशोषयस्यनुदिनं ननु वारि भूस्थं
काले प्रदातुमथ भूरिपयस्समृद्धिम् ।
कस्यास्ति देव ! ननु लोकहितैषणेत्थं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

43. गन्तव्यमन्तरहितं रथ एकचक्र-
इचाश्वास्तु सप्त ननु वायुसमानवेगाः ।
पङ्गुश्च चोदक इतीह विचित्रमेतत्
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

44. पङ्गुर्हि सारथिरसौ गरुडाग्रजन्मा
वेगेन धावति च ते विपुलो रथश्च ।
नो तिष्ठति क्वचिदपीह न गम्यमस्ति
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

45. अस्तं गते त्वयि च देव ! गभस्तिमालिन् !
दोषेति नाम भजते खलु रात्रिरेषा ।
दोषाकरत्वमथ चैति सुधामरीचि-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

46. त्रय्यन्तवेद्य ! निगमप्रतिपाद्यरूप !
लोकत्रयीसुजनवन्दितपादपद्म ! ।
कल्याणदा भवतु ते हि मरीचिमाला
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

47. आदित्य ! भास्कर ! दिवाकर ! दिव्यमूर्ते !
तेजोनिधे ! करुणया परिपालयास्मान् ।
नानाविधामयनिकायसुपीडिताङ्गान्
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

48. इद्रादिदेवनिकरान् मधुसूदनं वा
कात्यायनीपतिमजं गणनायकं वा ।
नव स्मरेदपि जनो न हि विस्मरेत्त्वां
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

49. मार्तण्ड ! ते किरणतूलिकया दिशासु
रात्रौ निलीनतमसः परिशिष्टभागान् ।
उन्मूलयन् धरणिमाशु करोषि दीप्तां
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

50. सूर्येन ! देव ! तव नाम सकृद्धि जप्त्वा
लोके जनो भवति पापविदूरजन्मा ।
दूरीकरोषि ननु पापमथाश्रितस्य
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

51. कान्तारसीमनि कनज्जलराशिमध्ये
कञ्जालये कुधरशेखरशृङ्गभूमौ ।
कञ्जाप्त ! ते समगतिः किरणप्रसार-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

52. त्वत्तः समुद्भवति देव ! समग्रविश्वं
त्वत्तो नु जीवति लयं च समेति पश्चात् ।
सृष्टिस्थितिप्रलयहेतुरसीह तस्मात्
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

53. शास्त्रेण किं ? किमथ शीलविशेषयुक्त्या ?
किं वा कुलेन ? किमु वा धनधान्यवृद्ध्या ? ॥
आदित्य ! नास्ति यदि तेनु कृपाविशेष-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

54. किं वा ब्रवीमि तव देव ! कृपाविशेष-
माहात्म्यमद्भुतमहो! तरवो लताश्च ।
म्लायन्ति नो यदि भवेत्किरणाभिमर्श-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

55. एकः क्षयी तदितरो ननु मन्दगामी
वक्री तथान्य इति चित्रमहो ग्रहास्ते ।
येषां त्वमीश इति साधु वदन्ति लोका-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

56. लोकोत्तरं ज्वलसि देव ! तथा न चान्ये
चैकोऽसि तेषु न पृथग्व्यवहारभावत्वम् ।
संसर्गतो हि सुगुणं च हिनस्ति दोष-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

57. गाढान्धकारमपनोदयसीह यस्मा-
त्तस्माद्धि शत्रुरसि देव ! सदा च राहोः ।
अन्ये तथा न हि भवन्ति न शत्रुता च
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

58. नो किञ्चिदस्त्यविदितं तव चास्ति वेद्यं
सर्वं हि पश्यसि सदा ननु दूरवर्त्ती ॥
संकथ्यसे तदनु भास्कर ! सर्वसाक्षी
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

59. यत्किञ्चिदेव यदि पश्यति योऽपि कोऽपि
सर्वो न पश्यति किलेह समग्रविश्वम् ।
देव ! त्वमेव ननु पश्यसि विश्वचक्षु-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

60. पूतेतरं यदपि वस्तु महीतलेऽस्मिन्
जागर्ति तन्ननु तवेह कराभिमर्शात् ।
पूतं भवेदहह ! भास्कर ! सद्य एव
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

61. गाढान्धकारवशनः किल दोषयुक्तं
यद्यत्समस्ति धरणौ ननु वस्तुजातम् ।
शुद्धं भवेन्न भगवंस्त्वयि चोदिते हि
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

62. अप्रार्थितोऽपि किल यच्छसि भास्कर ! त्व-
मारोग्यमप्यथ च कान्तिमनारतं हि ।
कारुण्यमद्भुतमहो किमिति ब्रवीमि ?
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

63. एकोऽपि हि त्वमिह देव ! समग्रविश्वं
कान्त्या प्रकाशयसि तद्ग्रहराजता ते ।
कार्येण सिध्यति ननु प्रभुता न चान्यै-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

64. अग्रे नु तिष्ठसि सतां ननु ये परोप-
कारेण धन्यचरिता, उपकारभाग्भ्यः ।
नो वाञ्छसि प्रतिफलं, न हि तेऽपि शक्ता-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

65. क्लेशोऽस्तु नाम तव पर्वसु सैंहिकेयात्
स्वल्पः स एव ननु देव ! यतो भवान् हि ।
लोकं ररक्ष किल तस्य सुधानिषेधा-
च्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

66. जप्त्वा त्वदीयशुभनाम स रामचन्द्र-
स्तं रावणं जनकजाहरणात्कृताघम् ।
घोराहवे ननु जघान समूलघातं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

67. श्रीराघवस्य चरिते त्रिजगत्प्रसिद्धे
वातात्मजातचरितं ननु नित्यपूज्यम् ।
शिष्यः स मारुतिरभूत्तव धन्यदीक्ष-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

68. साङ्गांश्च शास्त्रनिवहांश्चतुरोऽपि वेदान्
सर्वा अधीत्य च कला भवतः सकाशात् ।
सर्वज्ञतां ननु समाप समीरजात-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

69. चित्रश्च पाठनविधिः किल शिष्यवर्यः
शाखामृगो ननु गुरुः खचराग्रणीस्त्वम् ।
सर्वज्ञतामधिजगाम स चापि शिष्य-
इच्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

70. मन्दोऽपि यः स निरतं नियतं भवन्तं
संसेवते त्रिकरणैर्ननु याति नित्यम् ।
आरोग्यभाग्यमतुलं विपुलां श्रियं च
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

71. कञ्जाप्त ! ते करुणया ननु वायुसूनु-
र्नैपुण्यमप्यधिजगाम कपिः कलासु !
नो चेत्क्व मारुतिरसौ क्व नु वा भवांश्च
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

72. योऽपीह निन्दति भवन्तमनाप्तविद्यः
सोऽप्येति ते किरणजं सुखमंबुजाप्त !
नास्त्येव हि स्वपरभेद उदारबुद्धे-
इच्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

73. आलस्यदोषमपहाय जनाः ! स्वकीया-
मुद्धृत्य जीवनविधां मुदमाप्नुयात ।
सत्यं हि बोधयितुमित्थमुदेषि नित्यं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

74. गच्छंस्त्वमस्तशिखरं च दिनान्तकाले
नैव स्थिरा ननु जना विपदो भवन्ति ।
सत्यं प्रबोधयसि लोकमहस्करेत्थं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

75. संवीक्ष्य लोक इह तावकनित्यवृत्तं
ज्ञात्वाऽपि सच्चरितितामुपकारितां च ।
वाञ्छेन्न कोऽपि तव मार्गमथानुसर्त्तुं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

76. त्वं विश्वनेत्रमसि भास्कर ! विश्वरूप !
लोकों हि पश्यति ननु त्वयि पश्यतीह ।
अन्धा भवन्ति खलु चास्तमिते च सर्वे
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

77. क्षीराम्बुराशितनयावसतिः किलासौ
नारायणः सरसिजासनजन्मभूमिः।
मोदान्ननु त्वयि हि तिष्ठति वासुदेव-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो !॥

78. लोकः समर्पयति तुभ्यमथ त्रिसन्ध्य-
मर्घ्याञ्जलिं त्वमसि तेन नितान्ततृप्तः।
आरोग्यभाग्यमतुलं प्रददासि, नान्ये
छायापते ! ग्रहकुलाधिप ! लोकबन्धो !॥

79. लोके समस्तमपि वस्तु विनाशशीलं
तद्वद्विनाशि किल चेह मनुष्यजन्म।
एकस्त्वमेव ननु देव ! विनाशहीन-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो !॥

80. सर्वे ग्रहाः किल भवन्ति सहस्रभानो !
स्वातन्त्र्यहीनगतिकास्त्वमथैक एव।
स्वातन्त्र्यभागसि हि देव ! बहुप्रकाश-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो !॥

81. नो दृश्यते ननु परोपकृतिप्रसिद्ध-
स्त्वत्सन्निभः किल दिवाकर ! कोऽपि लोके ।
निःस्वार्थता क्वचिदपीह न दृश्यते हि
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

82. सृष्टिस्थितिप्रलयहेतुतया महात्मन् !
त्वं लोकपालनिवहादतिरिच्यसे हि ।
ते शब्दतस्त्वमथ सार्थकलोकपाल-
च्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

83. भूमीरुहा निखिलभूमिधरा लताश्च
नद्यः सरित्पतिरिमे मनुजा मृगाश्च ।
जीवन्ति ते किरणजालपराभिमर्शा-
च्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

84. किं वा वृणोमि भगवन् ! ननु भास्करेन !
त्वत्तो भवाब्धिविनिमज्जनतो हि मूढः ।
आरोग्यमेव सततं कृपया प्रयच्छ
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

85. गाङ्गोदकैर्न हि सदा त्वभिषेचयेयं
मन्दारमाल्यनिवहैर्न हि पूजयेयम् ।
अङ्गीकुरु त्वमथ भास्कर ! मे प्रणामं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

86. का पूजना तव हि भास्कर ! दिव्यमूर्त्तेः ?
का धूपदीपरचना किल चण्डदीप्तेः ? ।
किं वा निवेदनमहो ! ननु रक्षकाय ?
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

87. नो दृश्यते व्यति ते यदि सूर्य ! बिम्बं
गाढान्धकारविहृतिर्ननु कान्तिशून्यैः ।
अन्यैर्ग्रहैः किमिह नः परपुष्टकल्पै-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

88. वास्तोष्पतिप्रमुखदेवगणैरजस्रं
सप्तर्षिभिर्वसुगणैश्च तथा मरुद्भिः ।
सम्प्रार्थितः समुदयः खलु ते महात्मन् !
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

89. विश्वं समग्रमपि च त्वदधीनवृत्ति
विश्वाय यच्छसि समग्रमनामयं त्वम् ।
विश्वस्य जीवनमसि त्वमथेह भानो !
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

90. ब्रह्मा त्वमेव ननु विष्णुरथासि रुद्रः
सृष्टिस्थितिप्रलयहेतुरसीह यस्मात् ।
वेत्तुं समर्थ इह कोऽस्ति तवेन ! रूपं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

91. लोकैकबन्धुरसि भास्कर ! का नु नाम
सा बन्धुता ? भुवनदाहनशक्तिमांस्त्वम् ।
दाहाय न प्रयतसे ननु रक्षसोति
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

92. कल्याणदायि निरतप्रकटप्रसाद-
मिष्टार्थदानचतुरं भुवनैकपूज्यम् ।
अन्यन्न मेऽस्ति शरणं किरणं विना ते
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ।।

93. नैकत्र तिष्ठति भवान्न हि चास्ति खेदो
नास्त्येव कोऽपि गुरुकार्यवरे नियोक्ता ।
गन्ता तथापि नियतेऽध्वनि कार्यनिष्ठ-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

94. सर्वाभिवन्द्यचरितोऽसि विभो ! महात्मन् !
निष्पक्षपातमखिलैर्ननु सेव्यमानः ।
राराजसे ग्रहकुलाधिपतां विवृण्वन्
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

95. आप्तोऽपि वा भवतु कश्चिदनाप्तमुख्यो
यः कोऽपि वाऽस्तु यदि वाञ्छति ते प्रसादम्
सद्यः समेति ननु ते करुणाविलासा-
च्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

96. कालोऽसि देव ! ननु कालनियामकोऽसि
कर्त्ताऽसि च त्वमिह तद्विषयस्त्वमेव ।
कालाद्बहिर्भवसि च त्वमथास्य हर्त्ता
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

97. सर्वस्य नेत्रमसि भास्कर ! सर्वदर्शिन् !
सत्येव च त्वयि हि पश्यति सर्वलोकः ।
अन्तर्हिते त्वयि तु कोऽपि न पश्यतीह
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

98. जाम्बूनदाभकिरणैस्तव चैव भानो !
सम्पर्कमेत्य धरणिर्बहुशो दिनादौ ।
भातीव सा कनकभूषणभूषिताङ्गी
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

99. त्रैलोक्यमङ्गलमहाविभवैकहेतु-
राम्नायचोदितसुकर्मफलप्रदाता ।
वन्द्यस्तवास्तु विजयी किरणप्रसार-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

100. कालोऽसि हि त्वमथ कालनियामकोऽसि
कालेन ते नियम इत्यपि केचिदाहुः ।
सर्वं त्वयीह ननु युज्यत एव भानो !
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

101 आदित्य ! देव ! सकलामररूपभाक्त्वं
सर्वामरप्रमुखवन्द्यनिजस्वरूपः ।
त्वद्वन्दनाद्धि मुदिता ननु सर्वदेवा-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

102. ब्रह्मादिदेवनिकरात्मकतां यतस्त्वं
यासीह भास्कर ! ततः खलु वन्दनात्ते ।
प्रीणन्ति ते दिविषदो ननु सर्व एव
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

103. त्रैलोक्यसन्नुत ! नमज्जनपारिजात !
लोकातिग ! प्रकटदीप्तमयूखमालिन् ! ।
कालेश ! ते प्रणतिरस्तु सहस्रवारं
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

104. विश्वैकपूज्य ! तव विश्वगुणांश्च वेत्तुं
स्तोतुं प्रभावमथ कोऽहमहो दिनेश !
अज्ञेन चेयमिह ते ग्रथिता नुतिर्हि
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

105. शेषोऽपि नालमथ ते चरितं विवेक्तुं
लोकोत्तरस्त्वमतिमन्दमतिर्हि चाहम् ।
अङ्गीकुरुष्व मम वाचमिवार्भकस्य
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

106. ये चापि नित्यमिदमादरतः पठन्ति
स्तोत्रं हि भक्तिपरिपूतनिजान्तरङ्गाः ।
तांश्चापि पाहि करुणामयदृष्टिपातै-
श्छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

107. यच्चापशब्दितमिहास्ति मदीयपद्ये-
ष्वत्यादराद्रचितमेव न चापराधात् ।
अज्ञानतो ग्रथितमित्यपि वा क्षमस्व
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

108. कायेन चाथ वचसा मनसेन्द्रियैर्वा
बुद्ध्यात्मना च सततं क्रियते मया यत् ।
सर्वं हि तुभ्यमहमद्य समर्पयामि
छायापते ! ग्रहकुलाधिप ! लोकबन्धो ! ॥

इति श्रीमद्विठलदेवुनिवंशकलशाम्बुधिपूर्णशशाङ्कस्य भारद्वाजगोत्रतिलकस्य श्रीमद्वेङ्कटरायभट्टशर्मणः पौत्रेण, दैवज्ञशिखामणेः वीरास्वाम्यपरनामधेयस्य श्रीमद्वीरराघवशर्मणः षष्ठेन प्रियतनूजेन श्रीगौर्यम्बागर्भशुक्तिमुक्ताफलेन श्रीनिवास-शतकादिशतकचतुष्टयनिर्मितिसम्प्राप्तयशोविसरेण भगवत्कृपैक-वर्मणा सुन्दरशर्मणा विरचितं पञ्चमं छायापतिशतकं सम्पूर्णम् ॥

श्रीकृष्णार्पणमस्तु

शोधनी

पृष्ठं	श्लोकः	पंक्तिः	अशुद्धम्	शुद्धम्
5	13	1	क्वसि	क्वासि
11	39	3	अह्यं	मह्यं
13	48	1	इद्रादि	इन्द्रादि
13	48	3	नव	नैव
15	53	3	तेनु	ते नु
17	61	3	भवेन्न	भवेन्नु
21	77	3	त्बयि	त्वयि

विठलदेवुनि सुन्दरशर्मणा विरचितानीतरशतकानि

—०—

1.	श्रीनिवासशतकम्	रू. 2 00
2.	देवीशतकम्	रू· 3-00
3.	वीराञ्जनेयशतकम्	रू 3·00
4.	शम्भुशतकम्	रू 4-00

प्राप्तिस्थानम्-
श्रीमती विठलदेवुनि नागरत्नम्मा
1-9-1112/G/3, दयानन्दनगरम,
हैदराबाद्-500 044 (आन्ध्रप्रदेशः)